रारेरी श्वरस्य कुंडलो को अदी सर्पो हरिर्नारायणः समुद्रा त्का मुद्धरत इति वीवधो नार ह छ
ति हे नार कुंह धंवी देन स्त्वं अस्माकं दंडी कुंडी नानयसि यः हह: सपरिहारो वदति नादीकुं

॥ को लवेति॥ ६४॥ हे सुंदरि गह्वन कुंजमध्ये स्वच्छंदं को वसति सरभससवराहवग्ग॥
सरभाश्च शशकाश्च वराहाश्च क्रूकराश्च तेषां वर्गः पुनः शिखिगमनः कार्त्तिकेयः अ
र्जुनेन सह योद्धुं कर्तुं कीदृशो भवति सरभससवराहवग्गः सरभसात् एका येऽश्वावरा
जिताः तेषामाहवे संग्रामे अय्युः अयगामी॥ ६४॥ केति॥ ६५॥ कापि का

॥ कोत्ति वसइ सच्छंदं सुंदरि गिरिगहणकुंजमज्झंमि सह अज्जुणेण जोद्धं सिहिगमणो
केरिसो होइ॥ ६४॥ सरभससवराहवग्गो॥ कायरइमणं पइणो गणएगुण जुव्वणसलाह
णिस्स कयचउ वेडवत्तिसहा हूआसा केरिसा कत्ति॥ ६५॥ सरिसवहूआ॥ शुद्धप्राकृतं॥

॥ गुणगणयौवनश्लाघनीयस्य पत्युः कामनो हरति सरससवहूआ सह स्त्रावधूः प्रतिसहस्रा
पुनः कृतचतुष्पद सह: कृतानिनोग्निः कीदृशो भवति सरससवहूआ सर्षपद्युता ॥ शुद्ध
प्राकृतं॥ ६५॥ ५२

॥ पाणिग्गहेति॥ ६६॥ पाणिग्रहणं निवसनं पालियहणं वस्त्रं केमंडितं रोमं न ते समरंगणे: तु
ल्यरंगणे: लंकघय साहस्स वर्द्धितं रिपुबलं हे वीर पएलया केः खंडितं संग्रामांगणे॥ ६
६॥ रसिअइति॥ ६७ नो विद्वन् वद रसिकानां पुरुषाणां केनोच्चाटनं क्रियते नीरसरावेण
नीरसशब्देन तथा युवतीजनमानसं चित्तं केनोद्विज्यते केनोच्चाटनं क्रियते नीरसरागेण

॥ पाणिग्गहणलिअंमणु सोहइ किंहि मंडियं साहस॥ वड्ढं विवीर पयरिउ बलंकहिं
खंडिअं केण॥ ६६॥ समरंगणे हिं॥ रसिअ हे केणुच्चाडणु किज्जइ जुवइमाणसु केणुव
ज्जिए॥ तिसिय लोय रवणकेण सुहिज्जए पहुपणु पद्धजुवणेगिज्जइ॥ ६७॥ अपभ्रंसः

तिसियेत्ति॥ पुनः तृषितो लोकः क्षणेन केन तुष्यति नीरसरावेण पानीयसरावेण एत
त्प्रश्नं मम तु केन गीयते॥ प्रकाश्यते॥ अपभ्रंशः॥

॥सुयलोमेइति॥९८॥भ्रकरोमेघं१२छति मेघोपितथाभ्रकरं१२छति जोमेघकथय
मगरस्यराज्ञः सुताःषष्ठिसहस्रप्रमिताः केनदत्ता मेघःप्रत्युत्तरंददाति देवराद्भ्र
कर कपिलेनपुनःमेघः१२छति जोभ्रकरजनोलोकःपातालेलोके विशति केनभ्रक
देवलाह कं॰ रःप्रत्युत्तरंददाति देमेघबिलेण छिद्रेण॥९८॥धवलु इति॥ जोविद्धनवदस्मसानप्र

॥सुयलोमेदंपु छ्इ पुछ्इमेदो वितंतत्ताप्रुयलं केण्ढ्यासयलसुया केणज
णोविसइपायालं॥९७॥वराह्कबिलेणं॥धवलुज्जलेहिं केहिं सोहइधरणीमसाण
देसस्स नरयस्सरक्खवाला केहिं पढिवेढियाहुंति॥९९॥नलकलेकेहिं॥

... धरणी केधदिलोज्वले:शोभते प्रण नरकरंकेहिं नरकरंकेः नराणांमनुष्याणां
करंके ... नरकस्यरक्षपालाः केः परिवेष्टिताः भवंति नरकरंकैः नरकेये
रंकाः ... नरकरंकेः॥९९॥ प्रश्नमागधिकं॥ ५२

॥पेरीति॥७०॥ वैरी१२छति कुत्सोघनोमेघः गगनेआकाशे केःराजतेशोभते उत्तरं अहि
तपरकेहिं दे अहितशत्रोपक्षिभिःबकेः शोभतेपुनःकृता र्थानि सन्यानि नियतं निश्चितं
केर्नसमर्थ्यते केर्नमन्यते अहितपक्षेः शत्रुसमुदायेः ७०॥अहितपरकेहिं॥ पत्तुणेति॥७१
॥जोविद्धनवहूजनः सुभटजनो निधनेसंग्रामेकिंप्राप्य नूनं जनिसूदनस्येंद्रस्याध्वीसनंभज

॥पेरीपुच्छदिक कने राजतिकिस्तिनोरवनो केहिं॥ सच्छाइनकेहिंसमच्छंतिनिहतं
कतायंपि॥७०॥अहितपरकेहिं॥पत्तूण किंफटयनोनिद्दनेहृतानाअत्रासनंफबति
वंफनिसूदनस्स॥जोत्तूनरवोरतरनुरकसयाइपावा मोहंधकारगहनंलपकिलजे
ते॥७१॥विसमरणं॥ प्रश्नपेशाचिकं॥

ति॥उपविशातिप्रत्युत्तरं विसमरणं विषमरणं विषमेरणं प्राप्य विषमसंग्राम प्राप्यये संग्रा
मेम्रियंतेते स्वर्गंगच्छंति इतिशास्त्रे। तथापापपुरुषाः घोरतरदुःखशतानि भुक्का मोहंध
कारगहनंलपवदकिंलभंते विसमरणं विषेनमरणं विषमरणं॥७१॥ प्रश्नपेशाचिकं॥

॥जाणीति॥७२॥ रे पुरुष स्मृत्वा वद या युवति निंद्यते भिंनला सती निंद्यया विह्वला सती किं
चित्त्रिगदिति तं न जानाति सा कीदृशी उच्यते सुत्तेल्ली सुप्तेव निगद्यते यस्तु मात्रं तिलसर्षपान्
पीडितुं जानाति स विज्ञानी कीदृशः उच्यते पुनः प्रत्युत्तरं सुत्तेल्ली सुष्टु शोचन स्तैलिकः

॥जाणीयाणइ निंदे भिंनल्लासा कासवो घ्विरे संचरि॥ जो तिलसरसवपी ढेई जाणे
कीसणणि उत्तसविन्नाणी॥७२॥ सुत्तेल्ली ॥एतावता विदिग्मात्रं प्रश्नानां दर्शितं
२ मया येन येन हि माद्यंति ।तद्विदस्तौ उद्यतां॥७२॥ इति श्री विदग्धमुखमंडन
स्य तृतीयपरिच्छेदः॥३॥

सुतैलिकः॥७२॥ सुष्टु लौकिकं॥ एतावतेति॥ एतावत्प्रश्नानां दिग्मात्रं प्रदर्शितं ये
न प्रश्नेन पंडिताः माद्यंति हर्षिता भवंति तद्विदा प्रश्नविदा तदुद्यतां तत प्रश्नं कथ्यतां
कथ्यतां॥७२॥ इति श्री धर्मदास कृत विदग्धमुखमंडनस्य तृतीयपरिच्छेदावचूरिः सं ५२
पूर्णा॥ श्रीः॥

॥व्यक्तीकृत्येति॥१॥ यत्र प्रश्ने किमप्यर्थं प्रकटी कृत्य वाक्यंतरादर्थः कथ्यते सा प्रहेलि
कोच्यते॥ कस्मात् सादृश्यार्थप्रदर्शनात्॥ सा द्विधेति॥ तथा सा प्रहेलिका द्विधा भवति क
थं एकार्थी द्वितीया शाब्दी च इति द्विधा अर्थविज्ञानात् अर्थदर्शनात् आर्थी भवति पुनः
शाब्दानुगतः शब्दविशेषतं शाब्दी भवति॥१॥ तरुण्येति॥ भो वद तरुण्या युवत्या कंठे

॥व्यक्तीकृत्य किमप्यर्थं स्वरूपार्थस्य दर्शनात् यत्र वाक्यांतरादर्थः कथ्यते सा प्र
हेलिका॥१॥ सा द्विधार्थी शाब्दी च विख्याता प्रश्नशासने॥ आर्थी स्यादर्थविज्ञाना
त् शाब्दी शब्दविभेदतः॥१॥ तरुण्यालिंगितः कंठे नितंबस्थलमाश्रितः गुरूणां
संनिधानेपि कः कूजति मुहुर्मुहुः॥२॥ पानीयकुंभः॥

आलिंगितः तथा नितंबस्थलमाश्रितः कटीतटप्राप्तः गुरूणां संनिधानेपि श्वशुरादीनां स
मीपे निकटेपि मुहुर्वारंवारं कूजति यस्तु एवंविधः स को भवति॥ उत्तरं पानीयकुं
भः॥२॥

॥आपांडुपीनेति॥४॥ नोविद्वन्वद हंदैरपिसस्रहं अभिलाषयुक्तं तथा त्यर्थं करैः द
स्तैः कृत्वा किमाकृष्यते॥ उ० पक्कबिंबफलं॥ कथंभूतं फलं आपांडुपीन कठिनं आई
षत्पांडु कठिनं पीनं स्थूलं पुनः कं० वर्तुलं वर्तुलाकारं तथा मनोहरं चित्रहरं बाह्या
र्थे सकथं किं स्तनं ४॥ दुर्वारेति॥५॥ हे दुर्वारवीर्य राजन् सरूपि सको पेलवयि याश्यामा

॥आपांडुपीनकठिनं वर्तुलं सुमनोहरं करैराकृष्यते त्यर्थं किं हंदैरपि सस्रहं॥४॥
॥पक्कबिंबफलं॥ दुर्वारवीर्य सरूपि त्वयि या प्रसूता श्यामा सपत्न हृदये सुपयो
धरा च॥ तुष्टे पुनः प्रणतशत्रुसरोजसूर्ये सैवाद्यवर्णरहिता वद नाम का स्यात्॥५॥
॥ शास्त्री॥

श्यामवर्णा प्रसूता सपत्नहृदये शत्रुहृदये नोविद्वन्वद का भवति शास्त्री कृपाणिका
कथंभूता शस्त्री सुपयोधरा सुष्टुशोभनं पयो जलं धरतीति पयोधरा जलवती भोनरेश्वर त्व
यि तुष्टे सति सा एव शस्त्री आद्यवर्णरहिता प्रथमाक्षररहिता वद किंनामा भवति स्त्री आयु
वती मनोहरा कथंभूते त्वयि प्रणत० प्रणतानम्रीभूता ये शत्रवः ते एव सरोजानि तेषां विका

सनेसूर्यः तस्मिन् प्रणतश०॥५॥ शास्त्री॥

॥सदारीति॥६॥ नोविद्वन्वद सा कांता आश्रु शाङ्गं प्रियेस्य कथ्यस्य फल्यास्त्रा निमध्या
पि वैरियुक्ता न या रिमध्या सा कथं वैरियुक्ता न सदारिमध्या विरोधपरिहारमाह सदारि रि
कारो मध्ये यस्याः सा रिमध्या नितांतरक्ता विसिता श्वेतपुष्पा या रक्ता सा कथं श्वेता संसकार
मिता प्राप्ता सहिता सिता रिवर्णा तथाक पुनर्यथोक्तवादिनी अपि तु न हूती सा कांता का

॥सदारिमध्यापि नवैरियुक्ता नितांतरक्तापि सितैव नित्यं यथोक्तवादिन्यपि नैव दू
ती का नाम कांतेति निवेदयाशु॥६॥ शारिका॥ शकारसकारयोर्न दोषः॥ नीरसतरु
णबहुगुणवंतो नमइ निरंतर निच्चलहुंतो तरुगिज्जइ नहु फलपत्तं तसुनो जाणइ
इ पावइसो जसं॥७॥ गुणरूरको॥

नामा स्यात् का अंते यस्याः सा कांता सा
रिका॥६॥ नीरसेति॥ नो विद्वन्वद एतादृशः कस्तरुः गीयते कः कथ्यते कीदृशः नीरसो
पि पुनर्बहुगुणयुक्तः यो नीरसः स बहुगुणयुक्तः कथं पुनः कीदृशः निश्चलः सन् निरंत
रं परिभ्रमति यो निश्चलः स कथं परिभ्रमति ईदृशः तरुर्गीयते तस्य फलपत्राणि नैव

योजानाति सयशः प्राप्नोति उत्तरं कथ्यते॥ गुणरूरको
गुणरूक्ष स्त्रक कूपकः कूपस्तेनः॥७॥

॥घरघरेति॥ ८॥ यानायिका गृहे गृहे व्रजती सकललजन प्रिया कास्त्री तथा जीवती सतीवै
रिकारिणी भवति यात्क्षणे नमुच्यते तथा जानीथ यथा क्षणेन एकाकिनी उरिता सती
नयाति सा नायिका कान्न वति उत्तरं पासा सार ॥ इति प्रहेलिका॥ अथार्थ गुप्ता मिलि॰

॥घरघर व्रजे सयल पियारी जीवंती वैर नरी सा नारी रकण मुक्के बंधेइ केली तद
जाणय जइ जाय नवेल्ली॥ ८॥ कालसारादिकं हृद्यं अजमारादि गूढकं विदग्धा
:दुर्विदग्धानां कुर्वते दर्पशांतये॥ ९॥

॥कालसारेति॥ नो विद्वन् वद विदग्धाः पंडिताः दुर्विदग्धानां अर्द्ध ज्ञापकानां दर्पशांत
ये अहंकारोपशमाय एतादृशं कविलं कुर्वंति कीदृशं कालसा॰ यत्र कालः समयः
अवसरः तत्र कालसारं अजमार गूढं अतो मदेशः मारः कंदर्पः तान्यां गूढं अजमार
गूढं अथवा अजः आत्मा मारः कामः तान्यां गूढः तथा हृद्यं अयाहं पुष्पवती का लं ना

यं प्रसादनीयः इति हृद्यं अर्थगुप्तं पुनः सार गूढं
कालगुप्तं॥ ९॥

५५

॥अनुनेतुमिति॥ १०॥ नो विद्वन् वद कश्चित् पुमान् भर्त्ता मानिन्याः स्त्रियाः अनुनेतुं प्रसादी
कर्तुं यावत् चरणे पतितः स भर्त्ता तया नायिकया कस्मात् ताडितः कथं भूतायाः स्त्रियाः
सरागचरणायाः कस्मात् ताडित इति अद्याहं पुष्पवती तेनायं प्रसादनीयः कालः इति हृद्य
र्थगुप्तं॥ १०॥ रजस्वला॥ अवलोकेति॥ ११॥ गजानां बंधे पुत्रस्य सा पश्यंती दृष्टा कावित व्याध

॥अनुनेतुं च मानिन्याः दयितः चरणे सरागचरणायाः॥ यावत् पतितः स तया क्षणे
द्वताडितः कस्मात्॥ १०॥ रजस्वला॥ अवलोक्य स्तनौ वध्वाः गुंजाफल विभूषणौ॥
निःश्वस्य रोदितुं लग्ना कुतो व्याधकुटुंबिनी॥ ११॥

कुटुंबिनी स्त्री वध्वाः स्नुषायाः स्त
नौ गुंजाफल विभूषणौ अवलोक्य गुंजानां चिरमठीनां फलानि तेषां भूषणानि ययोस्तौ
गुंजाफल विभूषणौ दृष्ट्वा तदा सा निःश्वस्य पुनः पुनः श्वासं मुक्त्वा रोदितुं लग्ना कुतः क
स्माद्धेतोः नो विद्वन् वद मत्पुत्रस्य दृष्टिः हस्ति विषये बलं नास्ति ते न गुंजाफल विभूषणयु
न कौ स्तनौ यदि दृष्टिः हस्तिविषये बलं स्यात् तदा वध्वाः स्तनौ मुक्ताफल विभूषणौ भवतः अतः

कारणाद्रोदितुं लग्ना इति बलहृद्यं॥ ११॥

॥दरदिठीति॥१२॥सखीभिः ईषत् चूतं आम्रफलं आम्रमंजरी च दृष्ट्वा सखी विरहिणी दृष्ट्वा च
रणेरणद् त्के सो चूतः वद केन हेतुना सो चूतो दत्तः ता इति केनापि कथितं पुष्पिता ग्रदर्शनेन
स्याः स्मरकष्टं जातं अतः कारणात् दत्तो चूतः पुनः नो वद सखीभिः कं केल्लितरु नैपितः नतः
ततः केन हेतुना वद तेन कथितं अस्मिन् अशोके पुष्पिते अस्याः पतिसमेष्यति अतः कारणा

॥दरदिहचूअ मउलं विच्छड सहियाहिं विरहिणी सहिअं॥नमिऊं कं केल्लितरू चूउचल
णदृउ कुत्ते॥१२॥पिच्छतमणिमसत्थं विच्छियबहुयाइ झंतिमिच्छयरं॥दंसिअ कया
इसीसे कन्नोदो जाइ कुसुमाइ॥१३॥हृद्यजातिः॥

त्प्रणतः॥इतिहृद्यं॥१२॥विच्छितिमिति॥कया वध्वा निस्साचरं अनिमिषार्थ्यं विलोक्य स्पष्ट
तिज्ञी ह्वे जातिकुसुमे दर्शयित्वा शीर्षं कृते कुतः कस्मात् कर्णोत्तरं आवयोः कुले पुष्पवद
द्वले कृत्वा कृतयोः कार्ययोः करले शिरस इव कृत्ते न विस्मृतः इति दर्शितं अतो त्र न मार्गणं ५६
कार्यं इति उत्तरीत्यापि॥इति हृद्यजातिः॥१३॥

॥रविसुतेति॥१४॥असमरुक् असमं विषमं रुक् त्रिशूलं पाणौ यस्य स असमरुक् ईश्वरः ॰पालिः
अखिलं समस्तं जगत् विश्वम् अव्यात् रक्षतु कथं भूतः ईश्वरः रविसुते कर्णे कृता गोकर्ण
सर्पाः येन स रविसुतकृतगोकर्णः पुनः कथं भूतः श्रुतिविषययुगः श्रुतिविषयः
कर्णविषयो गुणो यस्य स श्रुतिवि॰ शब्दगुणमाकाशमिति वचनात् एतावता काशांतदे

॥रविसुतकृतगोकर्ण श्रुतिविषयगुणोंबरो वनात्मधरः॥नरकशिरा जगदखिलं
चिरमव्यादसमरुकपाणिः॥१४॥अजगूढं॥

वो बरं वस्त्रं यस्य स ईश्वरः अतः कारणात् दिगंबरः इत्यर्थः पुनः कथं भूतः वनात्म
धरः वनं तदेवात्मा वनात्मा वनं जलं जलमयं शरीरं तमात्मानं धरतीति वनात्मधरः श्चंद्र
पु॰क॰ मौलिः नरकशिरा नरस्य कं मस्तकं शिरसि यस्य स नरकशिरा ईश्वरः॥१४॥अजगूढं

॥ क्रुद्धेनेति॥ भीमानुजगोजभाजः भीमानुजोऽर्जुनः स एव गोजः गोः पृथ्व्याः जातः गोजः
अर्जुनवृक्षः तं भजंतीति भीमानुजगोजभाजो मयूराः दर्दुरदर्षकाले वर्षाकाले नृ
त्यंति नृत्यं कुर्वंति कथंभूताः भीमानुजगोजभाजः क्रुध्रेनसूडीनयनाग्नयासदग्धो
न्मदाः कुं पृथिवीं दधतीति कुध्राः पर्वतास्तेषामिनः स्वामी हिमाद्रिः तस्मात्सूत्यत्ति

॥ क्रुध्रेनसूडीनयनाग्नयासदग्धोन्मदा दर्दुरदर्षकाले॥ स्वजन्मनक्षत्रप्रिय
भोजनाशाः नृत्यंति भीमानुजगोजभाजः॥२५॥ अजमारसूदं॥

र्यस्यासा क्रुध्रेनसूः पार्वती तां डीनाति संतोषयतीति यस्सः क्रुध्रेनसूडीः महेशः
तस्य नयनाग्नयासो वह्निः क्रुध्रेन० तेन दग्धः कामः कंदर्पः तेनोन्मदा उन्मत्ताः क्रुध्रे
नसूडी० पुनः कथंभूताः भीमानुजगोजभाजः स्वजन्मनक्षत्रप्रियभोजनाशाः स्व
जन्मनक्षत्राः सर्पाः त एव प्रिया अभीष्टा भोजनाशाः भोजनमश्नंतीति भोजनाशाः ५७
येषां ते स्वजन्मनक्षत्रप्रियभोजनाशाः॥२५॥ अजमारसूदं॥

॥ वालाच्छीति॥२६॥ ईदयितः ई लक्ष्मीः तस्या दयितो भर्ता कृष्णः वो युष्माकं अरं डः खं
अरमत्यर्थं दरतात् कथंभूतः ईदयितः वालाच्छीतिः वातमश्नातीति वाताशः शेषाहिः स एव
शीतिः शयनं यस्य सः पुनः कथंभूतः अरिध्रः अरिं चक्रं दधातीति अरिध्रः चक्रपाणिः पुनः
कथंभूतः महासिः महान् असिः खड्गो यस्यासौ महासिः पुनः क० वीडब्राड्यानौकाः वयः

॥ वालाच्छीतिररिध्रो रं वो दरतात् महासिरीदयितः वीडब्राड्यानौका वार्वाहाभो
ऽभ्रमस्तानः॥२६॥ ईषतसूदं॥

पक्षिणस्तेषामीट् स्वामी गरुडः अपां पानीयानां राट् अब्राट् समुद्रः तावेव यानए
वोकसी यस्य सः वीडब्राड्यानौकाः पुनः कथंभूतः वार्वाहाभः वाः पानीयं वहंती
ति वार्वाहा मेघास्तेषां भा कांतिरिव कांतिर्यस्य सः वार्वाहाभः पुनः कथंभूतः अ
स्तानः अस्तं नीतं अनः शकटं दैत्यो येन स अस्तानः॥२६॥ ईषतसूढ॥

दयावानिति॥१८॥ बुद्धो जिनः त्रिभुवनं पायात् कष्टात् पायात् रक्षतु कथंभूतो बुद्धः दयावान्
दयायुक्तः पुनः कथंभूतः प्रयतः जितेंद्रियः पुनः कथंभूतः शुद्धः पापरहितः पुनः कथंभू
तः प्रबुद्धः महाज्ञानी पुनः कथंभूतः कमलेक्षणः कमललोचनः पुनः कथंभूतः पापापहः
पापमपहंतीति पापापहः॥१८॥ नसज्जतीति॥१९॥ एकः स सज्जनश्चिरं जयतीति सकः यः

॥दयावान्प्रयतः शुद्धः प्रबुद्धः कमलेक्षणः॥ पापापहस्त्रिभुवनं बुद्धः पायादपा
यतः॥१८॥ न सज्जति क्वचिद्दोषे प्रीणाति जगतो मनः॥ य एकः स परं श्रीमान् चिरं जय
ति सज्जनः॥१९॥ पादगूढश्लोकद्वयं॥ चतुर्थपादगुप्तं त्रयोः॥

क्वचिद्दोषे न सज्जति न सावधानो भवति तथा जगतो विश्वस्य मनः प्रीणाति संतोषय
ति परं प्रकृष्टं यथा भवति तथा कथंभूतः सज्जनः श्रीमान् इत्यः॥१९॥ अत्र श्लोकद्वये
चतुर्थपादगुप्तः पूर्वपादत्रयमध्ये॥ पादगुप्तश्लोकद्वयं॥

॥दृष्टो मयेति॥ काचिन्नायिका सखीं प्रति ब्रूते हे सखि अर्धरात्रौ मया स्वप्नमध्ये स्वभ
र्त्ता प्राणनाथो दृष्टः समां रोदयित्वा गतः मां रोदनं कारयित्वा गतः अत्र किं कारणं ब्रू
हि सा सखी कथयति हे भद्रे त्वं कल्याणिनी भूयाः कल्याणविष्टा सती स्थिरा भव
अतिनिर्मलां प्राचीं दिशां पश्य अत्र किं कथितं सख्या यथा पूर्वादिग्विरहिणी अपि

॥दृष्टो मया सखि ब्रूहि रोदयित्वा गतो ह्यमां॥ भद्रे कल्याणिनी भूयाः प्राचीं पश्या
ति निर्मलां॥२०॥ इति वस्त्वंतःगूढः॥ दाक्षिणपवणपुष्टविग्गा सा मीलइ लोयणाइ पहि
यवहू निउणसहीएणलिये कंठेव करे विहकेइ॥२१॥

पुनः सूर्येण विरहो भज्यते तत्र तत्त्वमविदुषितेन सह मिलिष्यसि इति वस्तुगूढं॥२०॥
दाक्षिणेति॥२१॥ काचित्पथिकवधूः दक्षिणपवनोद्विग्ना सती लोचने निमीलति वद
किमर्थं सा निपुणसख्या कराभ्यां कंठः स्थगितः कुतः मा कदाचन एतस्याः प्राणाः कं
ठदेशान्निर्गमिष्यंति अतः कंठः स्थगितः॥ इति वस्तुगूढं॥२१॥

५८

॥स्तुतनिंदेति॥साऽपह्नुतिःकथ्यते साकाया स्तुतिनिंदार्थवशात्‌द्व्यर्थयुक्तिः द्वावर्थौ
द्व्यर्थौ तयोर्युक्तिः अर्थद्वयोदयात्‌ कथितस्यार्थस्यापह्नवात्‌ उक्तार्थस्यगोपनात्‌ एवं
विधशब्दछलात्‌अपह्नुतिःकथ्यते॥२२॥ बक्रदोषेति॥अःकृत्स्नःतंलोकमाऽसम
द्रोदयं करोतु साम्रोदयं विदधातु अथवा विरथो नारायणःअसमसोदयंलोकं

॥स्तुतिनिंदातदर्थत्वात्‌ द्व्यर्थमर्थ द्वयोदयात्‌ निह्नवात्‌कथितस्यापि शब्द
छलादपह्नुतिः॥२२॥बक्रदोषोगुणध्वंसी गोहंताजनपीडकः करोतुविरथो
लोकं।मसमामसद्रोदयं॥२३॥विश्लोस्तुतिनिंदे॥

अस्तं करोतु कथंभूतःविरथः बक्रदोषा भ्रूतुभुजः बद्दोदोषःभुजारोभुजा यस्य
सः बक्रदोषः पक्षेदोषोघयुक्तः पुनः कथंभूतः अः विरथश्च अगुणध्वंसी सत्वरजस्तमो
गुणान्ध्वंसयतीति गुणध्वंसी पक्षेअगुणध्वंसी गुणविनाशकः। मुगुणः पुनःकं जनना
मादैत्यस्यपीडकरः पक्षेजनानांलोकानांपीडकः पुनःकं गोहंता गो नामादैत्यः तस्य

हंता पक्षेगोपृथ्वीतस्याहंता कं अः विरथः वि गरु
डः स एव रथो यस्य स पक्षे विगतरथः॥२३॥ विश्लोःस्तु
तिनिंदे॥

५९

॥सततमिति॥२४॥अस्मिन्‌कलिकालेहेराजन्‌कुपतिर्जातोजगतः कुत्सितःपतिःकुपतिः
इतिनिंदा पक्षेकुःपृथिवी तस्याःपतिःइतिस्तुतिः हेअ हितजनवत्सल अहितजनेशत्रु
जनेवत्सलोदर्षोयस्यस तस्य बोधनंहे अहितजनवत्सल सततंमहितपूजितजनेषुवत्स
लंदर्षोयस्यस तस्यामंत्रणं हे सततमहितजनवत्सल इतिस्तुतिः पुनः कथंभूतः बक्रन

॥सततमहितजनवत्सल बहुनयपापक्रियापरिभ्रष्टः॥इहकलिकालेकुपति
जगतःत्वंपरमडःखकरः॥२४॥राज्ञःस्तुतिनिंदे॥

यपापक्रियापरिभ्रष्टः बहुनयकारिणी पापक्रिया तयापरिभ्रष्टः इतिस्तुतिः द्वितीयप
क्षेअपरिभ्रष्टःपापक्रियायुक्तः पुनःकथंभूतस्त्वंपरमडखकरःपरंप्रकृष्टंअडःखक
रःपरमसौख्यकरः द्वितीयपक्षेपरमप्रत्यर्थंडःखंकरोतिइतिपरमडःखकरः॥२४॥
राज्ञःस्तुतिनिंदे॥

॥प्रसन्नवदेति॥राजानेश्वरः अन्यद्राजा चंद्रः प्रजा आनंदयति कथंभूतः राजा प्रस
न्नवदनः विकसितमुखः पुनः श्रीमान् द्रव्यः शोभावान् पुनः कथंभूतः लब्धमहोदयः ल
ब्धो महोदयो येन स लब्धमहोदयः पुनः क० करप्रचारसुभगः करो राजभागः तस्य
प्रचारेण सुभगः मनोहरः चंद्रपक्षे किरणानां प्रचारेण सुभगो मनोज्ञः एतादृशो राजा

॥प्रसन्नवदनः श्रीमान् अयं लब्धमहोदयः करःप्रचारसुभगो राजानंदयति
प्रजाः २४ चंद्रभूपती॥ विनायकादित प्रीतिः देवोगंगांबभारयः सर्वदोमा
धवः सत्वा मव्याद व्यर्थविक्रमः॥२५॥ द्विरिद्रो द्व्यर्थजातिः॥

यं प्रजा आनंदयति॥२४॥ विनायकेति॥ माधवो नारायणः त्वाम् अव्यात् रक्षतु कथं
भूतो माधवः विनायकादित प्रीतिः वीनां पक्षिणां नायको गरुडः तस्मिन्नादिता स्था पिता
प्रीतिर्येन सः को यो देवं अगं पर्वतं गां पृथ्वीं बभार दधौ पुनः क० सर्वदा दाता इति सर्वदः
मानो नीहरतां पुनः कथंभूतः सफलपराक्रमः पुनर्द्वितीयपक्षे सर्वदा उमाधवो हरः त्वां
अव्यात् स कः यो देवः गंगां बभार पुनः क० विनायकादित गणेशे आदिता प्रीतिर्येन सः

॥शीतकारेति॥२७॥ हे सखि शीत्कारं शिक्षयति अधरं व्रणयति पुनः रोमांचं तनोति
का चित् सखी वदति कुत्र कश्चित् नागरिको मिलितः सा कथयति हे सखि न हि न हि हे
मनः पवनः हेमंतोद्भवो वायुः॥२७॥ रुचिरेति॥ कवेर्मधुरशीलस्य वाणी जगन्मनोहर
ति कथंभूता रुचिर० मनोहरस्वरवर्णपदन्यासयुक्ता पुनः रसभावबती रसः शृंगारादि

॥शीत्कारं शिक्षयति व्रणयत्यधरं तनोति रोमांचं नागरिकः किं मिलितो न हि र
सखि हेमनः पवनः॥२७॥ रुचिरस्वरवर्णपदा रसभाववती जगन्मनो हरति तत्
किं तरुणी न हि न हि वाणी कवेर्मधुरशीलस्य॥२८॥ अपह्नुतिजातिः॥

: भावो विभावानुभावादिः तयोः संयुक्ता एतादृशी तत् किं तरुणी न हि र कवेर्वाणी कथंभू
तस्य कवेः मधुरशीलस्य॥२८॥ अपह्नुतिजातिः॥

॥स्वरेति॥ बिंदुयुक्तेषु स्वरेषु सत्सु दलानामक्षराणां यदवबोधनं ज्ञापनं तत् बिंदुमत्
कथयंति॥२५॥ केचिद्बिंदुमतीं प्राहुः॥मानसीति॥२०॥ मनसि भवा मानसी न मनसि भवा
नामनसी न्याससद्भावात् यथाक्रमं मानसी नामनसी चापकुनिसंपदा याधिगम्या आदिश
ब्दादिंगितादिरपि बुध्यादौ बाहुल्येन प्रयोगा तासामिह न निदर्शनं न कथितं ग्रंथगौरव

॥स्वरेषु बिंदुयुक्तेषु दलानामवबोधनं तद्बिंदुमदिति प्राक्तः केचित् बिंदुमतीम
ता॥२५॥ मानसी नामनसीत्याद्या बुध्यादौ न्यासतोपि या बाहुल्येन प्रयोगास्ताः
तासां नेह निदर्शनं॥२०॥

नयान्न निदर्शनं कृतं तथा आदिपदात् अंगुल्यादिनाक्षराकारोल्लेखेनाद्यपदा मूत्रा
विचित्रा वाचिकी प्रातिलोमकी मूलदेवी करपल्लवी वर्णपल्लवी अंकपल्लवी वर्गपल्ल
वीत्यादि वेद्या क्रमाद्यथात्र ग्रंथे तासामुदाहरणं लक्षणपूर्वकं न दर्शितं पूर्वोक्तहेतोः ६१
रलंविस्तरेण॥२०॥

॥अथ बिंदुमदुदाहरणं॥ त्रिनयनेति॥२१॥ कविर्ब्रूते अयं चंद्र उदेति उदयति कथं
भूतः चंद्रः त्रिनयनचू[illegible]रत्नं ईश्वरमुकुटरत्नं पुनः कथंभूतः सिंधोर्मित्रं समुद्रस्य
मित्रं पुनः कथंभूतः कुमुद्वतीदयितः ज्योत्स्नापतिः एतादृशः चंद्र उदेति॥२१॥
बिंदुमदुपन्यासः॥ [illegible]

॥त्रिनयनचूडारत्नं मित्रं सिंधोः कुमुद्वतीदयितः॥ अयमुदितधुस्तृणारुणतरुणीवद
नोपमश्चंद्रः॥२१॥ सखि [illegible] विधुमध्यगतं किं तव वदनगंडशेखरस्यांकं॥ दृश्यते चपर
स्पर विलोकनात् विस्मयं कुरुतः २२॥ बिंदुमज्जातिः॥

[illegible]॥ बिंदुमन्न्यासः॥ सखिवीति॥ काचित् पृच्छति हे सखि विधुमध्यगतं चंद्रां
तर्गतं किं दृश्यते प्र० हे नायिके तव वदनगंडशे[illegible]रस्यांकं मुखगल्लशेखरस्येदमंकं दृश्यते
कज्जलरूपोंकः उभौ निरीक्ष्यमाणौ विस्मयं कुरुतः जनयतः २२ बिंदुमज्जातिः॥ बिंदूपन्या
सः॥ [illegible]

॥क्रियादीति॥२३॥ यत्र श्लोके क्रियादिकं स्थितं भवति परं पदसंधानकौशलात् पदस्य
संधानं तत्र कौशलं तस्मात् कौशलात् स्फुटं न लक्ष्यते न ज्ञायते तत् प्रश्नं क्रियागुप्तपदं ज्ञेयं
॥२३॥ राजन्निति॥२४॥ कश्चित् कथयति भो राजन् कल्पं यावत् आसारं यावत् एनां पृथ्वीं ×सं×
अवरक्ष पालय पुनः भो नरेश्वर रणे संग्रामे विद्विषः शत्रून् रद्य खंडय कथंभूतः त्वं घनश्या

॥क्रियादिकं स्थितं यत्र पदसंधानकौशलात् स्फुटं न लक्ष्यते तत्स्यात् क्रियागुप्तादि
कं यथा॥२३॥ राजन्नव घनश्याम निस्त्रिंशाकर्षदुर्जय ॥आकल्पवसुधामेनां वि
द्विषो घ रणे बहून्॥२४॥अवद्यगूढौ॥

म निस्त्रिंश० घनवत् श्यामो निस्त्रिंशः खड्गः तस्याकर्षणे न दुर्जयः जेतुमशक्यः घनश्या
म०॥अवद्य इति द्वे क्रिये गुप्ते॥२४॥

× पुंस्कोकिलकुलस्येति नितांतमधुरारवैः सहकारद्रुमा रम्याः वसंते कामपि श्रियं ×५× ध्वनं

॥पुंस्कोकिलेति॥२५॥ सहकारद्रुमाः आम्रवृक्षाः वसंते कामपि अनिर्वचनीयां शोभां अधुः धृत
वंतः कथंभूताः सहकारद्रुमाः रम्याः मनोहराः नितांतमतिशयेन के मधुरारावे भ्रमराणां शब्दैः
कस्य पुंस्कोकिलकुलस्य अत्राधुः क्रियागुप्तं॥आरावैरिति पुंस्कोकिलस्येति संबंधः॥इति क्रि
यागुप्तं॥२५॥ न करोतु इति॥२६॥ नाम इति सत्ये असौ नरेश्वरः रोषं करोतु तथा परुषं कठोरं न

॥न करोतु नाम रोषं वदतु न परुषं न हंतु यं शत्रून् रंजयति महीमखिलां तथापि धीर
स्य वीरस्य॥२६॥ शरदिंदुकुंदधवलं नगनिलयरतं मनोहरं देवं यैः सुकृतं मनिशं ते हृत×
षामेव प्रसादयति॥२७॥

वदतु तु पुनः अयं शत्रून् न हंतु न विनाशयतु तथापि अस्य नरेश्वरस्य धीः प्रज्ञा खिलां समस्तां
मही पृथ्वीं रंजयति कथंभूतस्य नरेश्वरस्य वीरस्य अस्य वीरस्येति छेदः धीरिति पदं पृष्ठगुप्तं
पदगुप्तं॥२६॥ शरदिंदिति॥२७॥ तेषामेव मनोहरं देवं प्रसादयति तेषां केषां यैः प्राणिभिः जी
वैरनिशं निरंतरं सुकृतं कृतं भवति कथंभूतं हरं शरत्संबंधिचंद्रवत् कुंदवत् धवलं शुभ्रं नग
निलयरतं नगे हिमालये रतं॥२७॥ मन इति कर्तृपदे गुप्तं॥२७॥

६२

।।शीकरेति।।३८।। जवनमारुतः वेगवान्पवनः सरः सरोवरं क्षो नयति पक्षे सरोजवनस्य मारुतः सरोजवनमारुतः कथंभूतः पवनः शीक रासारसंवादी शीकराणां जलकणानां आसारो वेगवान्मेघः तं संवादयतीति संवादी शीकराणां वा तासंवारि शीकरः देमको वा त्विक्ष्यते म कइव पांथस्त्री निःश्वासैः मांसलः पुष्ट इव ।।३८।।सरइति कर्परगुप्तं।। सुभगेति ।।३९।। नोकस्याः पिशुण्यवतः पुंसः रमणी योदिवसः तां सुखं कुर्वन् अयति गच्छति कथंभूतो

।।शीकरासारसंबाही सरोजवनमारुतः प्रक्षो नयति पांथस्त्री निःश्वासैरिव मांसलः ।।३८।। सुभगतवाननपंकज दर्शनसंजाततनिर्भरङ्गीतिः ।। रामयति कुर्वन् दिवसः पुण्यवतः कस्य रमणीयः ।। रां कर्परगुप्तं।। भूतिपंकमयेत्यर्थं कासारे दुःखिता अमी दुर्वा राम्नानसं हंसाः गमिष्यंति घनागमे।।४०।।

सुभगतस्य हे सुभगतवाननं तव वदनकमलोत्पन्नदर्शननिर्भ्ररप्रीतेः।।३९।। रां कर्परगुप्तं।। ।।भूतीति।।४०।। दुर्वारा अमी हंसाः जलदागमे मानसं मानससरोवरं गमिष्यंति कथंभूताः कासारे दुःखिताः केन दुर्वारा अत्र दुष्टवाः वारिजलं तेन वारा दुर्वारा तृतीयां तं कथंभूते

कासारे अत्यर्थं यया स्या तथा भूतिपंकमये कुत्सितकर्दममये दुर्वारा तृतीयागुप्तं।।४०।। ६३

।।अहं मेति।।४१।। हे बक मोराक्षस मां त्वं नी मं जानीहि मया किं कृतं मांसादिकं सर्वं भुक्तं तव भुक्त्यर्थं नरकः कल्पितः नरस्य कः मस्तकं पक्षे नरकः निरयं कथंभूतो हं मदानसा यातः म दानसा कष्टेना यातः अथवा मदानसं पाकस्थानं तस्मादायातः मदानसा ।।४१।। मदानसा तृतीयागुप्तं।। अनोरुदेति।।का चित्कामिनी अंभोरुहमये कमलमये वापीजले स्नाता पक्षे अं

।।अंभोरुहमये स्नाता वापीपयसि कामिनी ददाति भुक्तसंपन्ना ध्रुवं सौ नाग्यकाम्य या।।४२।। चतुर्थीगुप्तं।। प्रसस्या युक्तमार्गस्थ तवसन्मानिताश्रिताः स्पृहयंति न केनाम गु

तृ णरत्नालय प्रभो;।।४३।। अहं मां नसायातः कल्पितो नरकस्तव मया मांसादिकं भुक्तं नीमं जानीहि मां बकः।।४४।। अत्र मदानसा गुप्तं।। तृतीयागुप्तं।। उपरिस्थश्लोकः।।४१।।

नोरुहं कमलं अयेका माय ददाति हः कामस्तस्मै अयै कथंभूता कामिनी नक्तिसहिता सौ नाग्य वांछया।।४२।। चतुर्थीगुप्तं।। प्रसस्यापिति।।४३।। हे प्रभो हे गुणरत्नालय हे उक्तमार्गस्थ तव प्र सस्य तव प्रसादाय केनाम न स्पृहयंति केस्पृहां न कुर्वंति अपितु सर्वे कथंभूताः के तव सन् मानं प्रति आश्रिताः पक्षे प्रसस्या निर्मलता तया युक्तः तदामंत्रणं नो प्रसस्या युक्त।। चतुर्थीयु तृ।।४३।।

॥सरसीति॥४४॥अयं जनो लोकः सरसीतः सरोवरात कंपानीयमुद्धृत्य निष्कास्य पिबति
किंभूतं कं दर्पकारकं बलकारकं पक्षे सरसीतोयं नदीजलं जनो लोकः पिबति कथंभूतं कंद
र्पकारकं कामजनकं पुनः कथंभूतं अंभोजसुरभि अंभोजानि कमलानि तैः सुरभि अंभोजं०
पुनः कथंभूतं स्वच्छं निर्मलं पुनः कथंभूतं एकांतशीतलं उभयपक्षविशेषणं समं॥४४॥अत्र

॥सरसीतोयं समुद्धृत्य। जनः कंदर्पकारकं ॥ पिबत्यंभो [illegible] सुरभि स्वच्छमेकांतशीतलं
॥४४॥ सरसीतः पंचमी सुप्तं॥ झिल्लीमुखैस्त्वया वीर डुव [illegible] निर्जितो रिपुः बिभेत्यत्यंतमलि
नो वनेपि कुसुमाकुले॥४५॥ अत्रालिन इति पंचमी सुप्तं

सरसीतः पंचमी सुप्तं॥ झिल्लीमुखैरिति॥ हे वीर त्वया डुवरैः झिल्लीमुखैः बाणैः निर्जितो रिपुः
कुसुमाकुले वने अलिनो भ्रमरादपि बिभेति भयं कुरुते पक्षे रिपुविशेषणं अत्यंतं अलि
नः अत्यंतमलिन इति रिपोर्विशेषणं अत्यंतमलीनः॥ अलिन इति पंचमी सुप्तं॥४५॥

६८

॥याकटेति॥४६॥सा कमला लक्ष्मी अस्ति कथंभूता कमला कमलालया कमलमेवालयो
निवासस्थानं यस्याः सा पुनः कथंभूता एकांते कुशे रोपिता प्रीतिर्यया सा सा का या लक्ष्मी
कटाक्षपातैर्मानुषं पवित्रयति पक्षे एकांते निश्चये रदसि वा रोपिता प्रीतिर्यया सा॥ अत्र एड
ति सप्तमी सुप्तं॥ विपद्येति॥ सर्वजनस्य निरूपणः तेजोरहितस्य विपद्यमानता सिद्धा मर

॥याकटाक्षच्छटापातैः पवित्रयति मानवं॥ एकांते रो [illegible] तडीति। रक्तिसा कमलाल
या॥४६॥ अधिकरणसुप्तं॥ विपद्यमानता सिद्धा सर्व [illegible] वनिरूपणः॥ तथा हि नस्य
पादाभ्यां निर्वाणं दत्यं जनः॥४७॥ अधिकरणसुप्त [illegible] वमध्यमासे स्मिन् सदका
रद्रुममंजरी॥ इयमुज्जिन्नमुकुलैः भातिन्यस्त झिल्लीमुख [illegible] ॥४८ षष्ठी सुप्तं॥

णमेवश्रेयः तथा विपद्यमानता सिद्धा तथा च प्रत्यक्षतया दृश्यते तदेव दर्शयति अयं जनो
लोकः जस्मरक्षां पादाभ्यां निर्वाणं विध्यापितं दत्ति अतो निस्तेजपुरुषस्य विपद्यमानता सि
द्धा॥४७॥ विपदि कष्टे इत्यधिकरणसुप्तं॥ वलीवेति॥ इयं सदकारद्रुममंजरी उज्जिन्नमुकु
ला विकस्वरा भाति पक्षे उज्जिन्नमुकुलैः फलं भाति एः पदे इत्थक कथंभूता न्यस्तझिं०

झपरालिबाणा वायन्नसा इयं मंजरीका इव एः कामस्य
तूणीव नोथ्याणाड्व दृश्यते॥४८॥ एः पदे सुप्तं॥

॥प्राप्तमेति॥४९॥ काचित्सखी स्वमनसि एवं चिंतयति एतस्यां नायिकायां प्राप्तमदः प्रा
प्तोमदो यस्येति प्राप्तमदः एतादृशो मधुमासोस्ति पक्षे मधुमासः प्रबलारुक् चैत्रमाससंबंधि
नी प्रबलारुक् प्राप्तमदः यौवनप्राप्तो भर्त्ता दूरंगतः इयं कुलपालिका निर्कैवर्त्तिनी दाइतिखेदे ८
इयं नायिका निश्चितं यथा भवति तथा दृतशीला विनष्टशीला भविष्यति॥४९ संबंधयुक्तं॥

॥प्राप्तमदो मधुमासः प्रबलारुक् प्रियतमो विदूरस्थः॥ असतीयं संनिदिता दृतशीलासखी नियतां॥४९
॥सर्वज्ञेन त्वया किंचित् नास्ति विज्ञातमीदृशं॥ मिथ्यावचस्तथा चत्वं असत्यं वे
त्सि न कुचित्॥५०॥ आमंत्रितयुक्तं॥

मधुमास इति षष्ठीयुक्तं॥ सर्वज्ञेति॥५०॥ त्वया सर्वज्ञेन किंचित् विज्ञातं नास्तीति ने
दृशं द्वितीयपक्षे हे सर्वज्ञ हे इनस्वामिन् त्वया किंचिद् विज्ञातं नास्ति इति न पुनः मिथ्या
वचः असत्यं तथा च यतः त्वं कुचिदपि न सत्यं वेत्सि किमपि यदि त्वं असत्यं वेत्सि तथा ६५
ज्ञानात् सर्वज्ञेन इति काक्का साध्यः॥५०॥ आमंत्रितयुक्तं संबोधनद्वयं युक्तं॥

॥कमले इति॥५१॥ कश्चिद् ब्रूते कमले कमले पद्मे नित्यं मधूनि मकरंदानि पिबतस्तव दो
षाकरोदये चंद्रोदये कष्टं न विद्यति अत्र संदेहो न यतः कमलसंकोचे मधुपान विच्छे
दे च पुनर्बंधनं कष्टं पक्षे हे अले भृंग कं सुखं तव वर्त्तते कमले मधूनि पिबतस्तव दोषं त
थैव अथवा यः कमले मधु मद्यं पिबति तस्य दोषाणां वैरूप्यादीनां समुद्रस्योदये प्रा

॥कमले कमले नित्यं मधूनि पिबतस्तव न विद्यति न संदेह कष्टं दोषाकरोदये॥५
१॥ आमंत्रितयुक्तं॥ विषादी नैक्षम् अश्नाति सदा रोगं न मुंचति रुष्टेनापि त्वया वीर
शत्रुनारिः समः कृतः॥५२॥ समासयुक्तं॥

प्ते कष्टं स्यात्॥५१॥ विषादीति॥५२॥ हे वीर रुष्टेन त्वया रिः रिपुः शत्रुना समं कृतः ईश्व
रेण तुल्यं विहितः कथंभूतेन शत्रुना अत्र विभक्तिविपरिणामात् प्रथमांत विशेषणं
अनयोस्तुल्यं विषादी विषं धत्तूरफलं विषं च अत्ति इति विषादी पक्षे विषादसहितः पु
नः कथंभूतः शंभुः सदा भैक्षं न क्षाति शत्रुरप्येवं सदा रोगं न मुंचति शत्रुः शंभुपक्षे स

दारः सभार्यः अंगं पर्वतं न मुंचति अत्र विषादी सदा
रोग इति समासयुक्तः॥५२॥

॥नित्यमिति॥ कंसस्य द्विषतो विष्णोस्तनुः शरीरं जयति किं कुर्वती तनुः मंडलाग्रं ख
गद्य॥ ड्गं शंखं च चक्रं बिभ्रती धारयंती पुनर्नित्यं मा लक्ष्मीर्यस्याः सा नित्यमा पुनः कथंभूता
देवैराराधिता नित्यं सेविता नित्यमा इति समासगुप्तं॥५३॥ नितांतेति॥५४॥ का
चिन्नायिका वक्ति हे सखि नितांतं स्वच्छहृदय अयं प्रत्यक्षः श्रेयान्नर्मसमागतः

॥नित्यमाराधिता देवैः कंसस्य द्विषतस्तनुः॥ मंडलाग्रं गदां शंखं च चक्रं जयति बि
भ्रती॥५३॥ समासगुप्तं॥ नितांत स्वच्छहृदयं सखि श्रेयान्नर्मसमागतः त्वां चिरा
द्दर्शनं प्रीत्या यः समालिंग्य रंस्यति॥५४॥ कलिकालमियं तावत् अगस्त्यस्य मु
नेरपि खंडयति मनः कोऽहं शशिखंडानुकारिणी॥५५॥ लिंगगुप्तं॥

योऽनर्मा त्वां चिराद्दर्शनं यथा भवति तथा प्रीत्या समालिंग्य आलिंगनं दत्त्वा रंस्यति रमिष्य
ति॥५४॥ अत्रास्वच्छहृदयं अयं न प्रत्यक्षो नासतेः॥ कलिकालेति॥५५॥ नो विद्वन्
वदस्य कलिका अलमत्यर्थं अगस्त्यमुनेर्मनः खंडयति तदाहं कः कथंभूता इयं क
लिका अर्धचंद्रसदृशा॥ अत्र कलिका स्त्रीलिंगगुप्तं पक्षे कलिकालं क्रियाविशेषणं॥

॥ श्री ॥

६६

॥प्रमोदमिति॥ गृहमेधिनो गृहस्थाः सदाराः कलत्रेण सहवर्तमाना प्रमोदं जनयंति पक्षे
क्रियाकारकयोरन्वयः गृहमेधिनो गृहस्थस्य सदा निरंतरं राः द्रव्यं प्रमोदं जनयति अथ
वा गृहमेधिनो द्वितीया॥ यदि तस्य धर्म[illegible] कामौ संगतौ न वेत्तां इमौ॥ सदारा इत्यत्र राः पदं
गुप्तं॥५६॥ कस्मात्त्वं दुर्बलेति॥५७॥ काचित्सखी सखवः कां नायिकां परिपृच्छति हे सखि

॥प्रमोदं जनयत्येव सदारा गृहमेधिनः यदि धर्मश्च कामश्च न वेत्तां संगतौ विभो॥५६॥
सुप्वचनगुप्तं॥ कस्मात्त्वं दुर्बलासीति सखवः तां परिपृच्छति॥ त्वयि संनिहिते तासु
दद्यात्किं कथयोत्तरं॥५७॥ तिङ् वचनगुप्तं॥

त्वं कस्मात् दुर्बलासीति॥ इ तत्रोपरि नायिका कां चित्सखीं प्रतिपृच्छति कथयतासु किमु
त्तरं दद्यात् सा वक्ति त्वयि संनिहिते उत्तरं ददामि दुर्बला न अस्यते सरयति इति दुर्बलासीति
अत्रासि इतिपदं गुप्तं तिङ् मध्यमपुरुषैकवचनं॥

॥अन्योप्यर्थ इति॥५८॥यत्र प्रश्ने एकमर्थं कथयित्वा पुनर्मात्राच्युताउपेता वा सहिता वात

न्मात्राच्युतकं भवति मात्राच्युते सति अन्यार्थः स्फुटो भवति तज्ज्ञाः प्रश्नवेत्तारः तन्मात्राच्यु

तकं कथयंति बिंदुच्युते पुनर्वा यत्र भवति तद्बिंदुच्युतकं आदि शब्दात् सर्वेषामनुक्तानां यद

एं विसर्गवर्णादीनां॥५८॥ मद्दाशयेति॥५९॥ जोजनाः खलवासात् तथान्यस्थानात् अतिश्रां

॥अन्योप र्थस्फुटो यत्र मात्राबिंदुच्युतेष्वपि॥प्रतीयते विदुः तज्ज्ञाः तन्मात्राच्यु

तकादिकं॥५८॥मद्दाशयमतिस्वच्छं नीरं संतापशांतये खलवासादतिश्रांताः समा

श्रयत हे जनाः॥५९॥

ताःअतिखेदंगताः यूयं संतापशांतये नीरं दिशत मद्दाशयं गंभीरं दर्शयत कथंभूतं

नीरं अतिस्वच्छं निर्मलं पक्षे हे जनाः खलवासात् दुर्जनवासात् अतिश्रांताः अतिखे

दंगताः संतापशांतये मद्दाशयं स्वच्छं एतादृशं नरं दर्शयत॥नरमित्यत्र ईकारच्युत ६७

कं॥द्वितीयार्थः स्फुटः॥५९॥

॥तुषारेति॥६०॥एको नागराजो जयति कथंभूतः नागराजः तुषारधवलः तुषारस्वच्छ वलः

श्वेतः स्फूर्जत् देदीप्यमानो महामणिस्तं धारयतीति स्फूर्जत्महामणिधरः पुनः कथं

भूतः अनघः निःपापः पुनः कथंभूतः पृथिवीधरणेक्षमः समर्थः पक्षे नगराजो हिमा

चलः एको जयति कथंभूतो हिमाचलः तुषारधवलः तुषारेण धवल उज्वलः इति वि

॥तुषारधवलः स्फूर्जत् महामणिधरोनघः नागराजो जयत्येकः पृथिवीधरणक्षमः

॥६१॥मात्राच्युतकं॥सुश्यामा चंदनवती कांता तिलकभूषणा कस्येषानंगभूःप्रीतिं भु

जंगस्य करोति न॥६२॥बिंदुच्युतकं॥

शेषाणानिदेयानि॥मात्राच्युतकं॥ सुश्यामेति॥एषानंगभूः कामिनी कस्य भुजंगस्य लंपट

पुरुषस्य प्रीतिं न करोति कथंभूतानंगभूः सुश्यामा पुनः कथंभूता चंदनलेपवती पुनः क०

कांतामनोहरा पुनः कथंभूता तिलकभूषणा पक्षे नगभूः भूमिः कीदृशी कस्य भुजंगस्य स

र्पस्य प्रीतिं न करोति कथंभूता नगभूः सुश्यामा श्यामवर्णा स्त्री पक्षे षोडशवार्षिकी पुनः क०

चंदनवत्यलंकृतकांतामनोहरा तिलकभूषणभूषिता अतन

कारपदकांताः बिंदुच्युतं॥६३॥

॥यथेति॥६१॥अयमेव कुलद्रुमः कुलालंबी धुमान् सत्संततिः प्रधानसंततिः कथंभू
तः कुलद्रुमः स्निग्धः तथा सन्मार्गे विहिता स्थितिर्येन स सन्मार्ग० पुनः कथंभूतः स
र्वाश्रयः सर्वेषामाश्रयः पक्षे अयं मे ममैव कुलद्रुमः वृक्षः सत्वसवः पत्रपुष्पफलसहि
तः पुनः कथंभूतः स्निग्धः अरूक्षः पुनः कथंभूतः सन्मार्गे राजपथे विहिता कृता

॥यथा सत्वसवः स्निग्धः सन्मार्गविहितस्थितिः॥तथा सर्वाश्रयः सत्यमयमेव
कुलद्रुमः॥६२॥बिंदुच्युतकं॥महीरुहो विहंगानां मेते हृद्यैः कलापिनां विरुतैः
स्वागतानीव नीरवाद्ताय कुर्वते ६३॥विसर्गच्युतकं॥

स्थितिर्येन तथा सर्वेषां पक्षिपथिकजनानामाश्रयः॥इत्ययमिति बिंदुच्युतकः॥६२
महीरुहइति॥६३॥एते महीरुहो वृक्षाः नीरवाद्ताय यच्छाय स्वागतानीव कुर्वते।
कैः कृत्वा विहंगानां रुतैः शब्दैः कथंभूतैर्विरुतैः हृद्यैः मनोहरैः पक्षे कथंभूतानां
विहंगानां हृद्यैः कलापिनां हृद्यं मधुरं एकमद्वितीयं लापितुं शीलं येषां तेषां हृद्यैः कला
पिनां अन्यत्र क लापिनां विरुतैः मयूराणां शब्दैः अत्र हृद्यैः विसर्गच्युतकः॥६३॥ ६८

॥अगस्त्यस्येति॥६४॥नहुषश्चक्रवर्ती सर्पतां गतः कथंभूतः महासुरवात् परिभ्रष्ट
ः कस्मात् अगस्त्यमुनेः शापात् पुनः कथंभूतः नहुषः ब्रह्मस्यंदनमास्थितः ब्रह्म
णः स्यंदनं रथमारूढः द्वितीयपक्षे नहुषः स्वात् आकाशात् परिभ्रष्टः सन् सर्पतां ग
तः कथंभूतः नहुषः महासुः महाप्राणः॥अत्र महासुर्विसर्गच्युतकं॥६४॥

॥अगस्त्यस्य मुनेः शापात ब्रह्मस्यंदनमास्थितः महासुरवात् परिभ्रष्टः नहुषः
सर्पतां गतः विसर्गच्युतकं॥६४॥महानपि सुधीरोपि बहुरत्नयुतोपि सन् विरसः
कुपरीवारः नदीनः केन सेव्यते॥६५॥अत्र नकारवर्णच्युतकः॥विशिष्टोपि॥

महानपिइति॥६५॥कविर्वदति एतादृशः नदीनः केन पुरुषेण न सेव्यते अपितु सर्वेण
सेव्यते। कथंभूतो नदीनः नदीनां मिनं स्वामी समुद्रः महानपि सुधीरोपि बहुरत्नयुतो
पि एतत्पर्यंतं नकारोपेतेन व्याख्येयं तदनंतरं अनया रीत्या व्याख्येयं एतादृशोपि के
न [illegible] सेव्यते किमर्थं कथंभूतः विरसः क्षारः पुनः कथंभूतः कुत्सितपरिवारः रौद्रजंतु

॥सुशील इति॥६६॥ सुगतो बुद्धः। कस्यचित्पुरुषस्य हृदि संस्थितः प्रीतिं तनोति विस्तारयति कथंभूतः सुगतः सुशीलः पुनः कथंभूतः स्वर्णगौरांगः स्वर्णवत् गौरं। अंगं यस्य सः। पुनः कथंभूतः पूर्णचंद्रसदृशवदनः पक्षे सुगतः इत्यत्र गकाररहितः सुतः कस्यचित् हृदि संस्थितः प्रीतिं तनोति अन्यत् तथैव अत्र गकारवर्णरहितोर्थः स्फुटः॥६६॥

॥सुशीलः स्वर्णगौरांगः पूर्णचंद्रनिभाननः सुगतः कस्यचित् प्रीतिं तनोति हृदि संस्थितः॥६६॥ अत्र गकारच्युतकं॥ तनोतु ते यस्य फणीशतल्पात् पाणौ मुरारेर्दयिता चशाख्या॥ ताभ्यां स्फुरद्वंद्वमशुभ्रदेहः पद्मागतिश्च क्रमसो विरंचिः॥६७॥

॥तनोत्विति॥६७॥ मुरारिर्नारायणः ते तव भद्रं कल्याणं तनोतु विस्तारयतु यस्य मुरारेः फणीशेषः शय्या तथा गरुडात् खगरुडः गतिः यस्य पाणौ चक्रं सुदर्शनं यस्य दयिता वल्लभा पद्मा यस्य नाभौ विरंचिर्ब्रह्मा कथंभूतो मुरारिः अभ्रवद्देहः कृष्णशरीरं॥६७॥ अत्र श्यामवर्णत्वात् मेघप्रतीतिः॥ स्थानच्युतकं॥ वा क्रमरहितं॥ ६९

॥हर इति॥६८॥ हरिर्नारायणः जगंति विश्वत्रयाणि पातु रक्षतु यो हरिर्लक्ष्म्या वृतः इति निश्चित्य वृतः स्वीकृतः इतीति किं। हरो महेशः द्विजिह्वाश्रितः सर्पाश्रितः चंद्रः क्षयी विवस्वान् सूर्यः तापकरः सुरेशः इंद्रः गोत्रभित् विधिर्ब्रह्मा शांतः एतानेतान् हरादीन् उपेक्ष्य लक्ष्म्या हरिर्वृतः॥ अत्र गोत्ररिपुः हरिविशेषणात् इंद्रस्य प्रतीतिः तस्मात् स्थानच्युतकं॥६८॥

॥हरः क्षयी तापकरः सुरेशः शांतो हरिर्गोत्ररिपुर्विवस्वान् चंद्रो द्विजिह्वाश्रितश्च उपेक्ष्य लक्ष्म्या वृतः पातु विधिर्जगंति॥६८॥ इक्षवो रुचिराः सर्वे सरसाः सर्वजनप्रियाः क्षमायाम् अनिसंपन्नाः दृश्यंते मगधे परं॥६९॥ अत्र नकारव्यंजनच्युतकं॥

॥इक्षव इति॥ सर्वे इक्षवः रुचिरा मनोहराः कथंभूताः सरसाः पुनः कथंभूताः सर्वजनप्रियाः क्षमायां पृथिव्यां समुत्पन्नाः परं मगधे मगधदेशे दृश्यंते पुनर्द्वितीयपक्षे निक्षवः साधवो मगधदेशे दृश्यंते कथंभूताः रुचिराः मनोहराः अथवा रुचिरां तिददंतीति सरुचिराः पुनः कथंभूताः क्षमायुक्ताः॥६९॥ अत्र नकारव्यंजनच्युतकं॥ इक्षवो निक्षवो वा॥

।।सत्यशीलेति।।७०।।इनः स्वामी सर्वात्मना सेव्यः सेवितव्यः केन पुरुषेण केन किं कुर्वता उच्चैः
पदं मोक्षं राज्यादि अभीप्सिता कथंभूत इनः स्वामी सत्यशीलदयोपेतः पुनः कथंभूतः इनः
दाता च पुनः अन्यत् शुचिः पवित्रः पुनः कथंभूतः अमत्सरः अहंकाररहितः पक्षे जिनः
स्वामी सर्वात्मना सेव्यः केन जनेन अभिमता पुरुषेण मोक्षाभिलाषिणा कथंभूतो जिनः दाता

।।सत्यशीलदयोपेतः दाता शुचिरमत्सरः।।इनः सर्वात्मना सेव्यः पदमुच्चैरभीप्सि
ता।।व्यंजनच्युतकं।।स्फोटयित्वा चिरं किंचित् पुनरन्यस्य दानतः यत्रापरो भवेदर्थ
ः च्युतदत्ताक्षरं यथा।।७१।।

पुनः कथंभूतः शुचिः पवित्रः पुनः कथंभूतो दानशीलदयायुक्तः अहंकाररहितः।।
७०।।अत्र जकारव्यंजनच्युतकं।। स्फोटयित्वेति।।७१।। यत्र पद्ये एकाक्षरं दूरीकृत्य
पुनरन्यत् प्रदीयते तदान्योऽर्थः प्रभवति तत् वक्ति तत् च्युतदत्ताक्षरं बुधैः कथ्यते इति ७०
शेषः।।७१।।

।।सदागतीति।।७२।।विधुश्चंद्रः एकं शिवस्थितः हरशिरसि स्थितः दीनः कलामात्रः कस्मा
त् पराश्रितत्वात् कथंभूतः सदागतिहृतोच्छ्राय सदागतौ गमने हृतः उच्छ्रायो वृद्धिर्यस्य
स एकत्र स्थितित्वेन कुब्जीभूतः पुनः कथंभूतः तमसो राहोर्वश्यतां गतः पक्षे अयं दीनः
इत्यत्र नकारं स्फोटयित्वा नस्थाने पः इति योज्यः तदा दीपः अस्तमेष्यति कथंभूतो दीपः

।।सदागतिहृतोच्छ्रायः तमसो वश्यतां गतः।।अस्तमेष्यति दीनोऽयं विधुरेकः शिव
स्थितः।।७२।।अत्र दीनः स्थाने दीपः च्युतदत्ताक्षरं।।

सदागतिना वायुना हृत उच्छ्रायो यस्य स हृतः प्रभावः पुनः तमसोंधकारस्य वश्य
तां गतः विधुरे कष्टे को भवेत् कथं स्यात् शिवस्थितः निरुपद्रवस्थितः अत्र दीपो गृ
हमध्यात् बहिरानीतः कोपि तद्वक्ति इत्युक्तिलेशः दीनः दीपः नस्थाने पः।।७२।।

॥पूर्णेति॥७३॥ कामिनी कस्य पुंसः स्वांतं मनः मदनोत्तरं मदनोत्कटं न करोति अ
पि तु सर्वस्य मनो मदनोत्तरं करोति। किंविशिष्टा कामिनी निर्मलांबरधरा निर्मलमं
बरं वस्त्रं यस्याः सा निर्मलांबरा पुनः कथंभूता पूर्णचंद्रमुखी पूर्णचंद्रवत् मुखं यस्याः

॥पूर्णचंद्रमुखी रम्या कामिनी निर्मलांबरा॥ करोति कस्य न स्वांतमेकांते मदनोत्त
रं॥७३॥ इति च्युतदत्ताक्षरजातिः॥ इति श्रीविदग्धमुखमंडनस्य चतुर्थः परिच्छेदः॥

सा पूर्णचंद्रमुखी तथा रम्या मनोहरा पक्षे यामिनी रात्रिः कस्य यूनो मनो मदनोत्तरं कामो
त्कटं न करोति अपि तु सर्वेषां। निर्मलांबरा निर्मलं अंबरं आकाशं यस्याः सा पुनः पूर्णचंद्र
मुखी पूर्णचंद्र एव मुखं यस्याः सा पूर्णचंद्रमुखी पुनः रम्या मनोहरा। अत्र कस्या नेय ७२
कारदानं॥७४॥ इति दत्ताक्षरं॥ इति श्रीधर्मदासविरचितविदग्धमुखमंडनस्य चतुर्थपरि
च्छेदः

॥विदग्धमुखमंडनं ललितपद्यपद्योत्तरं सुगूढभावसुंदरं सकलवृत्तसद्बोधकं॥ सदर्थगदने
सुधीविरचितं सुमेधाविधिः विलोक्य सुदृशानतानन मितीद्यामेस्य वै॥१॥ संवत् भूविधिवह्नि
नागकुमिते श्रेयस्करे दायने मासे माघ सितेतरे वियुतपक्षे दशम्यां तिथौ श्रीमद्राजपु
रे सदा सुखकरे सन्न्यैर्जनैरीडिते तत्तस्थेन सवाचकेन गणिना खुस्यालचंद्रेण सा॥२॥ वृ
७४ त्तिः स्वल्पतरा न युक्तिरपरा बालैः सुबोधदा कोसौ ह्यंव विदाय कोविदजनैः शोध्या म
यायाकृता हित्वा मत्सरमानसं मयि कृपां धृत्वा निजां सद्गुणैः यत्किंचित् लपितं तथान
गदितं क्षंतव्यमत्राधिकं॥३॥ नराहृत्ताशास्त्रं लिखितं मयात्र न चाभिधानं न पदोपन्यासः
लिपीकृतं केवलमर्थमात्रं विलोक्य बुधैर्मे सफलं प्रयासः॥४॥

त्वं

646

वे॰११२